# CCE PR

**ಸಂಕೇತ ಸಂಖ್ಯೆ : 16-S ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ**

**Code No. : 16-S Subject : First Language — SANSKRIT**

**प्रथम भाषा — संस्कृतम्**

**( ಹೊಸ ಪಠ್ಯಕ್ರಮ / New Syllabus )**

**( ಪುನರಾವರ್ತಿತ ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ / Private Repeater )**

***ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

i) ಇದು ಪ್ರಶ್ನೆ–ಸಹಿತ–ಉತ್ತರಪುಸ್ತಕವಾಗಿದೆ.

ii) ಪ್ರತಿ ಪ್ರಶ್ನೆಗೂ ಉತ್ತರ ಬರೆಯಲು ಪ್ರಶ್ನೋತ್ತರ ಪತ್ರಿಕೆಯಲ್ಲಿಯೇ ಸ್ಥಳಾವಕಾಶ ಮಾಡಿಕೊಡಲಾಗಿದೆ. ಉತ್ತರಗಳನ್ನು ನಿರ್ದಿಷ್ಟಪಡಿಸಿದ ಜಾಗದಲ್ಲಿಯೇ ಬರೆಯಬೇಕು.

iii) ಈ ಪ್ರಶ್ನೋತ್ತರ ಪತ್ರಿಕೆಯು ***A, B, C ವಿಭಾಗ***ಗಳಿಂದ ಕೂಡಿದ್ದು ಒಟ್ಟು 63 ಪ್ರಶ್ನೆಗಳನ್ನೊಳಗೊಂಡಿದೆ.

***'A' ವಿಭಾಗ***ದಲ್ಲಿ ಗದ್ಯ, ಪದ್ಯ, ಪೂರಕ ಪಾಠಗಳಿಗೆ ಸಂಬಂಧಿಸಿದ 40 ಪ್ರಶ್ನೆಗಳಿವೆ.

***'B' ವಿಭಾಗ***ದಲ್ಲಿ ವ್ಯಾಕರಣಕ್ಕೆ ಸಂಬಂಧಿಸಿದ 19 ಪ್ರಶ್ನೆಗಳಿವೆ.

***'C' ವಿಭಾಗ***ದಲ್ಲಿ ರಚನಾ ವಿಭಾಗಕ್ಕೆ ಸಂಬಂಧಿಸಿದ 4 ಪ್ರಶ್ನೆಗಳಿವೆ.

iv) ವಿದ್ಯಾರ್ಥಿಗಳು ಸೀಸದ ಕಡ್ಡಿ (ಪೆನ್ಸಿಲ್) ಯಿಂದ ಉತ್ತರಗಳನ್ನು ಬರೆಯಬಾರದು. ಪೆನ್ಸಿಲ್‌ನಿಂದ ಉತ್ತರ ಬರೆದಲ್ಲಿ ಮೌಲ್ಯಮಾಪನಕ್ಕೆ ಪರಿಗಣಿಸಲಾಗುವುದಿಲ್ಲ.

v) ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆಯನ್ನು ಓದಲು 15 ನಿಮಿಷಗಳ ಹೆಚ್ಚಿನ ಕಾಲಾವಕಾಶ ನೀಡಲಾಗಿದೆ.

vi) ನಿಮ್ಮ ಪ್ರಶ್ನೋತ್ತರ ಕಿರುಪುಸ್ತಕದ ಬಲಭಾಗದಲ್ಲಿರುವ ಗೆರೆಯ ಪಕ್ಕದ ಖಾಲಿ ಜಾಗದಲ್ಲಿ ಯಾವುದೇ ರೀತಿಯ ಬರಹಗಳನ್ನು ಬರೆಯಬಾರದು.

***परीक्षार्थिनां सामान्याः सूचना :***

i) इदं प्रश्नयुक्तम् उत्तरपुस्तकम् अस्ति ।

ii) प्रत्येकं प्रश्नस्य उत्तरं लेखितुं प्रश्नयुक्ते उत्तरपुस्तिके एव पर्याप्तः स्थलावकाशः प्रकल्पितः । निर्दिष्टस्थानेषु एव उत्तराणि लेखनीयानि ।

iii) अस्मिन् प्रश्नयुक्ते उत्तरपत्रे ***A, B, C*** इति विभागत्रयं भवति । आहत्य 63 प्रश्नाः भवन्ति ।

***'A'*** विभागे गद्य-पद्य-पूरकपाठसम्बन्धिनः 40 प्रश्नाः भवन्ति ।

***'B'*** विभागे व्याकरणसम्बन्धिनः 19 प्रश्नाः भवन्ति ।

***'C'*** विभागे रचनासम्बन्धिनः 4 प्रश्नाः भवन्ति ।

iv) परीक्षार्थिनः उत्तराणि अङ्कनी (पेन्सिल्) द्वारा न लिखेयुः । पेन्सिल् द्वारा लिखितानि उत्तराणि मौल्यमापनार्थं न परिगण्यन्ते ।

v) परोक्षार्थिभ्यः प्रश्नानां पठनार्थम् अर्थग्रहणार्थं च पञ्चदशनिमेषकालावकाशः अधिकाः प्रदत्ताः ।

vi) दक्षिण पार्श्वे आरक्षित स्थाने किमपि न लेखनीयम् ।

# विभागः - A

**( गद्य-पद्य-पूरकपाठाः )**

**( 79 अङ्काः )**

I. एकवाक्येन उत्तरं लिखत – 16 × 1 = 16

1. इन्द्रः कस्य तपोवनं वव्राज ?
2. कः भूमिं परितः प्रदक्षिणं करोति ?
3. बाल्ये शास्त्रिमहोदयस्य गृहपरिसरः कथम् आसीत् ?
4. कर्णस्य सारथिः कः ?
5. इदं सर्वं केन वास्यम् ?
6. भारतमाता कैः पूजिता ?
7. अञ्जना कीदृशं सुतम् असूत ?
8. लोकः केन ग्रथितः ?
9. कस्य नमस्कारेण दीर्घमायुः जायते ?
10. ध्रुवस्य पिता कः ?
11. चन्नम्मायाः पतिः कः ?
12. तपोधनः दधीचिः किमिति प्रसिद्धः अभवत् ?
13. संस्कृतसाहित्ये ज्ञानपीठपुरस्कृतः कः ?
14. किं शाश्वतं तिष्ठति ?
15. सुरुचेः पुत्रः कः ?
16. शैलशृङ्गवासिनी का ?

II. चतुर्थपदं लिखत – 4 × 1 = 4

17. नागार्जुनः – रसरत्नाकरः :: वराहमिहिरः – ........................... ।
18. चारुदेवशास्त्री – रामरखी :: सत्यव्रतशास्त्री – ........................... ।
19. शुभेन कर्मणा – सौख्यम् :: पापेन कर्मणा – ........................... ।
20. अनादिरनन्तः – शिवः :: नगाधिराजः – ........................... ।

III. लघूत्तराणि संस्कृतभाषया लिखत – 5 × 2 = 10

21. दधीचेः तपोवनं कथम् आसीत् ?

22. डा० सत्यव्रतशास्त्रिमहोदयेन प्राप्ताः देशीयाः प्रशस्तयः काः ?

23. औरङ्गजेबेन प्रेषिते सन्देशपत्रे किं लिखितम् ?

24. मानवः निर्वेदं कथम् आप्नोति ?

सः ततः किं करोतिः ?

**अथवा**

बुद्धिसागरः मुञ्जं किम् आह ?

25. पादपजातयः काः ? तासां जन्म कथं भवति ?

IV. श्लोकयोः तात्पर्यं कर्णाटकभाषया, आंग्लभाषया, संस्कृतभाषया वा लिखत – 3 × 2 = 6

26. न जायते म्रियते वा विपश्चित्
नायं कुतश्चिन्न बभूव कश्चित् ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ।।

27. यत्र कुत्र वा वयं समग्रभारते स्थिता
भाषयापि धर्मतश्च भिन्नमार्गमाश्रिता ।
आदितश्च मध्यतस्तथान्ततश्च भारता
भारतीयभावनेति वृद्धिमेतु भारते ।।

**अथवा**

यथा बीजं विना क्षेत्रमुप्तं भवति निष्फलम् ।
तथा पुरुषकारेण विना दैवं न सिद्ध्यति ।।

28. अद्याहं पर्वकाले तु जिघृक्षुः सूर्यमागतः ।
अथान्यो शहुरासाद्य जग्राह सहसा रविम् ।।

V. कवयोः देश-काल-कृतीनां विषये लिखत – 2 × 3 = 6

29. भासकविः ।

30. वेदव्यासः ।

**अथवा**

विद्वान् एच्०वि० नागराजराव् ।

VI. यथानिर्देशम् उत्तरं लिखत — 3 × 3 = 9

31. भवानेव संस्कृतेन ग्रन्थान् लिखतु ।

क: पाठः ? कः अवदत् ? कम् अवदत् ?

32. भवद्दर्शनेन परमां निर्वृत्तिं प्राप्तोऽस्मि ।

क: पाठः ? कः अवदत् ? कस्य दर्शनम् ?

33. रसे गन्धे न रज्यते ।

क: पाठः ? कः अवदत् ? कः न रज्यते ?

**अथवा**

जग्राह सहसा रविम् ।

क: पाठः ? कः अवदत् ? कम् अवदत् ?

VII. दशवाक्यैः उत्तरं कर्णाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत — 4 × 4 = 16

34. किमर्थं मुञ्जः भोजं मारयितुं प्रयतते ?

35. पद्यभागे निरूपितान् नाट्यांशान् सङ्गृह्य लिखत ।

36. धर्मराजस्य उपदेशं विवृणुत ।

**अथवा**

तपोधनः दधीचिः त्यागधनः कथं संवृत्तः सङ्गृह्य लिखत ।

37. भीष्मयुधिष्ठिरयोः संवादं पद्यानुगुणं सङ्गृह्य लिखत ।

VIII. श्लोकौ पूरयत — 2 × 4 = 8

38. पिबन्ति नद्यः ..................................................................

.................................................................................. ।

..................................................................................

.................................................................................. ॥

39. मनीषिणः सन्ति ..................................................................

.................................................................................. ।

..................................................................................

.................................................................................. ॥

IX. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत – $4 \times 1 = 4$

40. भारतदेशः कृषिप्रधानः देशः । अत्र अनेके जनाः कृषिकार्यं कुर्वन्ति । कृषकाः सर्वेषां पोषकाः अन्नदातारः च भवन्ति । इदानीं विद्यावन्तः जनाः कृषिं त्यजन्ति । एतत् देशस्य मारकं भवति । अतः 'सर्वे जनाः सन्तोषेण कृषिकार्यं कुर्युः' इति गान्धिमहोदयस्य आशयः ।।

i) भारतदेशे अनेके जनाः किं कुर्वन्ति ?

ii) सर्वेषां पोषकाः के ?

iii) विद्यावन्तः जनाः किं त्यजन्ति ?

iv) गान्धिमहोदयस्य आशयः कः ?

## विभागः - B

### (व्याकरणविभागः)

### (30 अङ्काः)

X. निम्नलिखितेषु प्रश्नेषु अपूर्णविवरणेषु वा प्रत्येकाय चत्वारः विकल्पाः प्रदत्ताः । तेषु एकमेव शुद्धं उपयुक्तं वा वर्तते । उपयुक्तं विकल्पं चित्वा प्रश्नस्य समक्षे निर्दिष्टस्थाने अक्षरसहितं अस्योत्तरं पूरयतु । $10 \times 1 = 10$

41. स्वाधीनः – अस्य विरुद्धार्थकं पदम् इदं भवति –

(A) दीनः (B) पराधीनः

(C) आदीनः (D) प्राधीनः ।

42. अत्र समूहेतरपदम् इदं भवति –

(A) तमः (B) अन्धकारः

(C) तिमिरम् (D) प्रकाशः ।

43. 'भार्या' शब्दस्य समानार्थकं पदम् इदं भवति –

(A) भर्ता (B) भ्राता

(C) पत्नी (D) पतिः ।

44. करीन्द्रः अत्र एषः समासः भवति –

(A) तत्पुरुषः (B) द्वन्द्वः

(C) बहुव्रीहिः (D) अव्ययीभावः ।

45. 'अवर्णयत्' अत्र एषः लकारः भवति –

(A) लट् लकारः (B) लङ् लकारः

(C) लिट् लकारः (D) लोट् लकारः ।

46. अत्र इदं शुद्धं वाक्यं भवति –

(A) पुरुषकारस्य विना दैवं न सिद्ध्यति (B) पुरुषकारः विना दैवं न सिद्ध्यति

(C) पुरुषकारे विना दैवं न सिद्ध्यति (D) पुरुषकारेण विना दैवं न सिद्ध्यति ।

47. 'मित्राणि' अत्र एषा विभक्तिः भवति –

(A) प्रथमा (B) सप्तमी

(C) षष्ठी (D) चतुर्थी ।

48. 'विषकण्ठः' अस्य विग्रहवाक्यं एवं भवति –

(A) विषे कण्ठः यस्य सः (B) विषं कण्ठे यस्य सः

(C) विषं कण्ठः यस्य सः (D) विषेण कण्ठः यस्य सः ।

49. छात्रः अध्येतुं शालां गच्छति ।

अत्र वाक्ये इदं कृदन्तपदं भवति –

(A) छात्रः (B) शाला

(C) अध्येतुम् (D) गच्छति ।

50. अत्र इदं समूहेतरपदं भवति –

(A) पठितवान् (B) लिखितवान्

(C) खादितवान् (D) धनवान् ।

51. सन्धिं विभज्य सन्धि नाम लिखत – $2 \times 1 = 2$

i) ततस्ततः

ii) भवतीति ।

52. प्रयोगपरिवर्तनं कुरुत – $2 \times 1 = 2$

i) बालकः चित्रं पश्यति ।

ii) तेन धनं लभ्यते ।

53. रेखाङ्कितपदम् अवलम्ब्य प्रश्ननिर्माणं कुरुत – $2 \times 1 = 2$

i) संस्कृतकविषु <u>डा० सत्यव्रत शास्त्रिमहोदयः</u> मुकुटमणिरिव विराजते ।

ii) दधीचिना स्वदेहः <u>इन्द्राय</u> अर्पितः ।

54. विग्रहवाक्यं विलिख्य समासनाम लिखत – $2 \times 1 = 2$

i) प्रतिवर्षम्

ii) धनधान्यतैललवणानि ।

55. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत – $2 \times 1 = 2$

i) बालकः पाठं पठित्वा शालां गच्छति ।

ii) पुष्पेण विकसितव्यम् ।

56. लकारपुरुषवचनानि लिखत – 2 × 1 = 2

i) बभूवुः

ii) पठति ।

57. लिङ्गविभक्तिवचनानि लिखत – 2 × 1 = 2

i) रामे

ii) कर्मणा ।

XI. वाक्ये विद्यमानं अलङ्कारं सलक्षणं विवृणुत – 3

58. माघे मेघे गतं वयः ।

XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत – 3

59. धर्मश्च जानाति नरस्य वृत्तम् ।

## विभागः - C

### (रचनाविभागः)

### (16 अङ्काः)

XIII. संस्कृतभाषया अनुवादं कुरुत – 3

60. ಯೋಗವು ಆರೋಗ್ಯಕ್ಕೆ ಅವಶ್ಯಕ. ಯೋಗದಿಂದ ರೋಗ ನಾಶವಾಗುತ್ತದೆ. ಆದ್ದರಿಂದ ಎಲ್ಲಾ ಜನರು ಯೋಗವನ್ನು ಅಭ್ಯಾಸ ಮಾಡುತ್ತಾರೆ.

Yoga is necessary for health. By doing yoga diseases can be destroyed. So, all the people practise yoga.

XIV. कर्णाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत – 3

61. 'सत्यं वद, धर्मं चर' इति उपनिषत् वाणी अस्ति । भारतदेशे 'सत्यमेव जयते' इति राष्ट्रवाणी अस्ति । अतः सर्वे जनाः सत्यं वदेयुः ।।

XV. पत्रं लिखत – 5

62. प्रणवः / प्रणीता इति मत्वा शैक्षणिकप्रवासार्थं धनं प्रेषयितुं मातरं / पितरं प्रति पत्रं लिखत ।

**अथवा**

दशमिकक्ष्यायाः प्रणवः / प्रणीता इति मत्वा दिनत्रयं विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत ।

XVI. 63. एकं विषयम् अधिकृत्य प्रबन्धम् लिखत – 5

i) सङ्गणकयन्त्रम्

ii) राष्ट्रियपर्वदिनम्

iii) जनसंख्यास्फोटः ।